वियोज्य *DETACHABLE*

0000232

# SANSKRIT

## Paper II
## (LITERATURE)

CS [illegible] 2015

| *Time Allowed : Three Hours* | *Maximum Marks : 250* |
| --- | --- |

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

There are **EIGHT** questions divided in **Two Sections.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining **THREE** are to be attempted choosing at least **ONE** from each section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4, 5** and **6** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission certificate. Answers written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## SECTION 'A'

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं विधीयताम् (150 शब्दपरिमितम्) : 10×5=50

**1.(a)** कुमारसम्भवं कालिदासस्य कलायाः सुन्दरसृष्टिरस्ति । 10

**1.(b)** भगवद्गीतायां कर्मयोगमधिकृत्य एकां टिप्पणीं लिखत । 10

**1.(c)** नैषधीयचरितं कलापक्षपातिनां काव्यानां मुकुटमणिरस्ति । 10

**1.(d)** स्वप्नवासवदत्ते स्वप्नदृश्यस्य नाटकीयं महत्त्वं प्रतिपादयत । 10

**1.(e)** वर्णकरप्रणीत-'शिवराज्योदय'स्य शैलीसौन्दर्यं प्रपञ्चयत । 10

**2.** अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया । 17+17+16=50

**2.(a)** ईशावास्योपनिषदि प्रदिपादितं दर्शनम् । 17

**2.(b)** माघमहाकवेः शास्त्रवैदुष्यं सप्रमाणं प्रकाशयत । 17

**2.(c)** कौटिल्यस्य अर्थशास्त्रे अर्थनीतिः । 16

**3.** अधोनिर्दिष्टानां विषयाणां सारपरिपूर्णा समीक्षा कार्या । 17+17+16=50

**3.(a)** 'कादम्बरी अस्त्यतिद्वयी रचना' इति सप्रमाणं स्थापयत । 17

**3.(b)** अभिज्ञानशाकुन्तले कालिदासेनाविष्कृतं जीवनदर्शनम् । 17

**3.(c)** मृच्छकटिकं चरित्रचित्रणप्रधानेषु रूपकेष्वन्यतमम् । 16

**4.** अधस्तनेषु विषयेषु नागराक्षरैः संस्कृतभाषायामेव विवेचनं विधेयम् । 17+17+16=50

**4.(a)** मेघदूते प्रणयस्य विह्वलता विवशता विकलता च आत्मानं साकारेण रूपेण परिणमयन्ती संलक्ष्यते । 17

**4.(b)** ऐतिहासिककाव्येषु राजतरंगिण्याः वैशिष्ट्यम् । 17

**4.(c)** अमरुशतकस्य काव्यसौष्ठवम् । 16

## SECTION 'B'

**5.** नागराक्षरैः संस्कृतभाषायां व्याख्यायन्ताम् (150 शब्दपरिमितम्) : 10×5=50

**5.(a)** क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ 10

5.(b) यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदु:खसुखं धीरं सोऽमृतत्वाय कल्पते ।। 10

5.(c) आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते श‍ृङ्गाणि यस्यातपवन्ति सिद्धाः ।। 10

5.(d) न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ।। 10

5.(e) पीडितां दु:खसंतप्तां परिक्षीणां तपस्विनीम् ।
ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ।। 10

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायां कार्या । 17+17+16=50

6.(a) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।। 17

6.(b) न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।। 17

6.(c) क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ।। 16

7. अधोलिखितानामाशयं ससन्दर्भं प्रतिपादयत । 17+17+16=50

7.(a) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।। 17

7.(b) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः । अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः । 17

7.(c) शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।। 16

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 17+17+16=50

8.(a) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ।। 17

8.(b) विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ।। 17

8.(c) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।। 16

---